# क्षयाधिमासः

चांदनी शर्मा*


## सारांशः -

क्षयो मासः इति क्षयमासः। यस्मिन् चान्द्रमासे सूर्यस्य सङ्क्रान्तिद्वयं जायते स क्षयमासः भवति। **द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित्।**[1] मासगणना तु चान्द्रमानेनैव सार्धमेव तत्र सूर्यसङ्क्रान्तिरपि आवश्यकी। यस्मिन् मासे क्षयमासः दृश्यते, ततः मासत्रयपूर्वं तथा च त्रिमासानन्तरम् एको अधिमासो भवति तदेवात्र स्पष्टरूपेण वर्ण्यते।


**कुञ्जीशब्दाः -** क्षयमासः, चान्द्रमासः, सङ्क्रान्तिः, **द्विसङ्क्रान्तिमासः,** मासगणना चान्द्रमानम्, सूर्यसङ्क्रान्तिः अधिमासः।

---

ज्योतिषशास्त्रे समयतिथिमासनक्षत्रादिनां भूमिका गूढतमा वर्तते। कालगणनायां सूर्यचन्द्रादिग्रहनक्षत्राणां च प्रभावः दरीदृश्यते । एतेषामेव दीप्तपिण्डानामाधारेण मासनिर्धारणं क्रियते । एतेष्वपि मासेषु केचन विशेषस्थितियुक्तमासाः **क्षयाधिमास** नाम्ना ज्ञायन्ते । विशेषखगोलीयस्थितौ क्षयाधिमासयोः आनयनं भवति। दर्शान्तादर्शान्तं यावत् चान्द्रमासस्य गणना क्रियते। यस्मिन् चान्द्रमासे सूर्यस्य संक्रान्तिर्नभवति स अधिमाससंज्ञको भवति। विपरीतस्थितौ यस्मिन् चान्द्रमासे सूर्यस्य संक्रान्तिद्वयं दृश्येते स क्षयमासनाम्ना ज्ञायते।

**असङ्क्रान्तिमासोऽधिमासः स्फुटः स्यात्**
**द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित्।**
**क्षयः कार्तिकादित्रये नान्यतः स्यात्**
**तदा वर्षमध्येऽधिमासद्वयञ्च॥**[2]

लोकव्यवहारे ज्योतिषशास्त्रे च सौरचान्द्रयोः व्यवहारः दृश्यते तथा तत्र संक्रान्तियुक्ता एव चान्द्रमासाः गृह्यन्ते। क्षयाधिमासयोः विषये कथ्यते यत् क्षयमासस्तु कदाचिदेव भवति परन्तु

---

*शोधच्छात्रा (ज्योतिषविभागः), श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नई दिल्ली।

[1] सि०शि०,ग. अ. श्लो. ६
[2] सि.शि. ग.अ. ,श्लो०-६

अधिमासः निश्चितकाले द्वात्रिंशन्मासानन्तरम् अवश्यं दृश्यते।

**द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा।**
**घटिकानां चतुष्टयेन पतति क्षयाधिमासकाः।।**

- **अधिमासः -**

**भवन्ति शशिनो मासाः सुर्येन्दुभगणान्तरं।**
**रविमासोनितास्ते तु शेषाः स्युरधिमासकाः।।**[3]

**"दर्शः सूर्येन्दुसङ्गमः"** एति शब्दकल्पद्रुमाधारेण यदि पश्यामश्चेत् अधिको मासः अधिमासः। चैत्रवैशाखादिद्वादशमासान्विहाय अवशिष्टमासोऽयम् अधिमासनाम्ना ज्ञायते। अस्यैव अधिमासस्यापरो नाम मलमासः, मलम् अर्थात् विकारः द्वादशमासानतिरिच्य सौरचान्द्रमानयोः विकारवशात् उत्पद्यते अयं मासः, अतः मलमास इति संज्ञा दत्ता बुधैः।

**मेषादिस्थे सवितरि यो-यो मासः प्रपूर्यते चान्द्रः।**
**चैत्राद्यः स विज्ञेयः पूर्तिर्द्वित्वेऽधिमासोऽन्यः॥**[4]

विषयेऽस्मिन् मुहूर्तचिन्तामणिकारेण रामदैवज्ञेन कथितं यत् **"स्पष्टार्कसंक्रान्तिविहीन उक्तो मासोऽधिमास"** स्थूलरूपेण वदामश्चेत् चान्द्रमासे यस्मिन् सूर्यसंक्रान्तिर्नभवति एतादृशमासः अधिमासरुपेण स्वीक्रियते। अधिमासः कथमुत्पद्यते ज्योषिशास्त्रानुसारेण?

**दर्शावधिश्चान्द्रमसो हि मासः सौरस्तुसङ्क्रान्त्यवधिर्यतोऽतः।**
**दर्शाग्रतः सङ्क्रमकालतः प्राक् सदैव तिष्ठत्यधिमासशेषम्॥**[5]

अर्थात् दर्शावधिश्चान्द्रसमो हि मासः अर्थात् अमान्तादमान्तं यावत् चान्द्रमासः, चैत्रादयः सङ्क्रान्त्युक्ताः भवन्ति। अमान्ताद् सङ्क्रान्तिकालं यावत् कालो अधिशेष नाम्ना ज्ञायते। अधिशेषस्यैव वर्धितकालो एकचान्द्रमासतुल्यो यदा भवति तदा अधिमासः भवति।

**सौरान्मासादैन्दवः स्याल्लघीयान्यस्मात्तस्मात्संख्यया तेऽधिकाः स्युः।**
**चान्द्राः कल्पे सौरचान्द्रान्तरे ये मासास्तज्ज्ञैः तेऽधिमासाः प्रदिष्टाः॥**[6]

अनुपातं कृत्वा यदा सिद्धान्तज्योतिषाधारेण पश्यामश्चेत् -

रविमासः ३०/२६/१७ सावयवसावनैः सम्पद्यते।

---

[3] सू.सि, मध्यमाधिकार,श्लो – 35

[4] शाकल्यसंहिता

[5] सि.शि. गोलाध्याये, म.ग., श्लो०-१६

[6] सि०शि०, गो.म.ग. , श्लो. ११

तथैव चान्द्रमासः २६/२१/५० सावयवसावनैः सम्पद्यते।

रविचान्द्रमासयोरन्तरम् = ३०/२६/१७ - २६/२१/५० = ०/५४/२७ भूदिनात्मको कालो अवशिष्यते।

तत्र $\frac{०/५४/२७ x ३०/२६/१७}{२६/२१/५०}$ = ३२/१५/३१


३२/१५/३१ सौरमासैः एकोऽधिमासः उत्पद्यते इति।

- **क्षयमासः -**

क्षयो मासः इति क्षयमासः। यस्मिन् चान्द्रमासे सूर्यस्य सङ्क्रान्तिद्वयं जायते स क्षयमासः भवति। **द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित्।**[7] मासगणना तु चान्द्रमानेनैव सार्धमेव तत्र सूर्यसङ्क्रान्तिरपि आवश्यकी। यस्मिन् मासे क्षयमासः दृश्यते, ततः मासत्रयपूर्वं तथा च त्रिमासानन्तरम् एको अधिमासो भवति। भास्कराचार्यः वर्णयति यत् क्षयमासः कार्तिकादित्रये अर्थात् मार्गशीर्षादिमासत्रये एव समुपलभ्यते -

**"क्षयः कार्तिकादित्रये नान्यतः स्युः तदा वर्षमध्येऽधिमासद्वयञ्च।"**[8]

ग्रहस्य स्वोच्चस्थाने गतिरल्पा एवञ्च नीचस्थाने गतिरधिका भवति तस्यैव ग्रहस्य, स्पष्टमिदं यद् यदा ग्रहस्याल्पो गतिः तदा मासस्य पूर्तिः अधिककालेन जायते विपरीतं यदा ग्रहस्यगतिरधिका भवति तदा अल्पकालेन मासस्य पूर्तिः ग्रहो करोति। मिथुनराशिगतसूर्यस्य नीचराशिः धनुर्भवति, तत्र स्थितो दिवाकरः अल्पकालेन अधिकगत्यवशात् मासस्य पूर्तिः करोति तदा एकचान्द्रमासे द्विसंक्रान्तिमासवशात् क्षयमासः भवति इति।




| | | | |
|---|---|---|---|
| प्र. अमा = | प्रथम अमान्तः, | प्र. सं. | = प्रथमा संक्रान्तिः |
| द्वि. सं. = | द्वितीया सङ्क्रान्तिः, | द्वि. अमा. | = द्वितीय अमान्तः |

यथा आह आचार्यभास्करः -

**गतोऽब्ध्यद्रिनन्दै ६७४ र्मिते शाककाले**
**तिथीशै११५ र्भवत्यथाङ्गाक्षसूर्यैः१२५६।**

---

[7] सि०शि०,ग. अ. श्लो. ६
[8]

**गजाद्रयग्निभूमि १७८ स्तथा प्रायशोऽयं**
**कुवेदेन्दु १४१ वर्षैः क्वचिद्गोकुभिश्च ॥**[9]

अधिमासस्यैवापरसंज्ञाः मलमासपुरूषोत्तममासादयश्च। धार्मिकदृष्ट्या मासस्यास्य महत्ता वर्तते। मासेऽस्मिन् व्रतोपवासयज्ञवापीकूपतड़ागप्रतिष्ठादि कार्याणि न करणीयानि इति शास्त्राज्ञा।

**माङ्गल्यमभिषेकञ्च मलमासे विवर्जयेत्**
**त्यजेद्यानं महादानं व्रतं देवविलोकनम्।**
**वापीकूपतडागादिप्रतिष्ठां यज्ञकर्म च।**[10]

क्षयमासेऽपि शुभकार्याणि न करणीयानि इति ज्योतिर्विद्भिः उक्तमस्ति। कस्यापि कार्यस्य शुभफलं न प्राप्यते यदा तत् कार्यं क्षयाधिमासयोः क्रियते।

**वाप्यारामतड़ागकूपभवानारम्भप्रतिष्ठेव्रतारम्भोत्सर्ग।**
**वृद्धस्त्वास्तशिशुत्व इज्यसितयोः न्यूनाधिमासे तथा॥**

[9] सि. शि.

[10] सि.तत्त्व.वि. प्रबन्ध